# श्री सोमनाथसंस्कृत-युनिवर्सिटी, वेरावलम्
# सत्रान्तपरीक्षा, अक्तुबर - 2019

| | | |
|---|---|---|
| **कक्षा – शास्त्री-1 (SEM-1)** | **सत्रम् – 1** | **गुणाः - 70** |
| **विषयः – वेदः** | **प्रश्नपत्रम् - 5 - CC - 1.1.1** | **समयः- 11:30 तः 02:30** |
| **दिनाङ्कः- 14/10/2019** | **संदर्भग्रन्थः – वैदिकसूक्तसंग्रहः** | |

**( प्रथमान्वितिः - युनिट-1 )**

**प्र-1 अधोलिखितेषु द्वावेव मन्त्रौ व्याख्यायताम् । 10**

1. अग्ने यं यज्ञमध्वरं विश्वतः परिभूरसि ।
   स इद् देवेषु गच्छति ।।
2. विष्णोर्नुकं वीर्याणि प्रवोच यः पार्थिवानि विमने रजांसि
   यो स्कमायदुत्तरंयद्दुतत्रं सधरस्थ विचक्रमाणस्त्रेधोरुगायः ।।
3. अहं रुद्राय धनुरातनोमि ब्रह्मद्विषे शरवे हन्तवा ।
   अहं जनाय समदं कृणोम्यहं द्यावापृथिवी आविवेश ॥
4. प्रवर्तनामुशती उपस्थादश्वे इव विषिते हासमाने ।
   गावेव शुभ्रे मातरारिहाणे विपाद् शुतुद्रीपयसा जवेते ।।

**प्र-2 अधस्तनयोः एकः मन्त्रः पठितभाष्यमनुसृत्य व्याख्यायताम् । 10**

1. विष्णुसूक्तस्य वैशिष्ट्यमुपवर्णयत ।
2. पर्यावरणदृष्ट्या विश्वामित्रनदीसंवादवैशिष्ट्यमुपस्थापयत ।

**( द्वितीयान्वितिः - युनिट-2 )**

**प्र-3 द्वयोरेव व्याख्या विधेया । 10**

1. वि वृ-क्षान् हन्त्युत हन्ति रक्षसो विश्वंविमाय भुवनं महावधात् ।
   उतानागा ईषते वृष्ण्यावतो यत्पर्जन्य: स्तनयन् हन्ति दुष्कृतः ।।
2. यस्य व्रते पृथिवी नन्नमीति यस्य व्रते शफवज्जर्मुरीति ।
   यस्य व्रत ओषधीर्विश्वरूपाः सन: पर्जन्य महि शर्म यच्छ ।।
3. उपहूताः पितरः सोम्यासोबर्हिष्येषुनिधिषु प्रियेषु ।
   त आ गमन्तु त इह श्रुवन्त्यधि ब्रुवन्तु तेऽवन्तस्मान् ।।

**प्र-4 एकः समाधेयः । 10**

1. वरुणदेवस्य स्वरूपमुपस्थापयत ।
2. पर्जन्यसूक्तस्य वैशिष्ट्यं लिखत ।

**( तृतीयान्वितिः - युनिट-3 )**

**प्र-5 अधोलिखितयोः प्रश्नेया: एकस्य समाधानं विधीयताम् ।** **10**

1. यज्जाग्रतो दूरमुदैतिदैवं तदुसुप्तस्य तथैवैति ।
   दूरङ्गमं ज्योतिरेषां ज्योतिरेकं तन्मे मनः शिवसङ्कल्पमस्तु ।।
2. पुनरेहि वाचस्पते देवेन मनसा सह ।
   वसोष्पते निरमयमय्येवास्तु मयि श्रुतम् ।।
3. यद् वो मनः परागतं यद् बद्धमिह वेह वा ।
   तद् व आ वर्तयामसिमयि वो रमतां मनः ।।

**प्र-6 एकस्यैव उत्तरं लिखत ।** **10**

1. शिवसङ्कल्पसूक्तस्याधारेण मनसः स्वरूपं प्रतिपादयत ।
2. राष्ट्र-सभा-सूक्तस्य विषयान् उपस्थापयत ।

**प्र-7 दशानां लघूत्तराणि लिखत ।** **10**

1. सायणानुसारं रयिम् - इत्यस्यार्थं लिखत .
2. कविक्रतु - त्यस्य सायणानुसारं कोऽर्थो भवति
3. अङिग अङ्गारा:- इति कस्य वचनम्
4. दाशुषे - इत्यस्य सायणभाष्यानुसारं कोऽर्थः
5. मृगो न - इति कस्मिन् सूक्ते विद्यते (ऋग्वेदस्य)
6. शूषम् - इत्यस्य सायणभाष्यानुसारं कोऽर्थः
7. गिरिश्रित - इत्यस्य कोऽर्थः (सायणानुसारम्)
8. सधस्थम् - इत्यस्य कोऽर्थः (सायणानुसारम्)
9. विपश्यति- इत्यस्य कोऽर्थः (सायणानुसारम्)
10. उग्रं कृणोमि - इत्यस्य कोऽर्थः (सायणानुसारम्)
11. हासमाने - इति कस्मिन् सूक्ते उक्तमस्ति
12. तवसम् - इति पदं कस्मिन् सूक्ते पठितमस्ति
13. अपौरुषेयं वाक्यम् - इति कस्य शास्त्रस्य परिभाषा अस्ति
14. अग्निसूक्ते कियत्यः ऋचः सन्ति (निर्धारितपाठे)
15. कियन्तो वेदाः सन्ति के च ते

************